CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सं.१५

श्री·रा·कि·प·

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रा॰कि॰ श्रीरामायनमः अनेकशतसाहस्रंविषण्णंहरिवाहिनीं जांमवान्समुदीक्ष्यैवंहनुमंतमथाब्रवी
१ त् १ वीरवानरलोकस्यसर्वशास्त्रविशारद तूष्णीमेकांतमाश्रित्यहनुमन्किंनजल्पसि २
हनुमन्हरिराजस्यसुग्रीवस्यसमोह्यसि रामलक्ष्मणयोश्चापितेजसाचबलेनच ३ अरिष्टने
मिनःपुत्रोवैनतेयोमहाबलः गरुत्मानितिविख्यातःउत्तमःसर्वपक्षिणां ४ बहुशोहिमयादृष्टः
सागरेहिमहाबलः भुजगानुद्धरन्पक्षीन्महाबाहुमहाबल ५ पक्षयोर्यद्बलंतस्यतावद्भु
जबलंतव विक्रमश्चापितेजश्च नतेनापहीयते ६ बलंबुद्धिश्चतेजश्चसत्वंचहरिपुंगव राम
विशिष्टंसर्वभूतेषुकिमात्मानंनसज्जसे ७ अप्सराप्सरसांश्रेष्ठाविख्यातापुंजिकस्थला॥ १

Kashi Maharani Collection; Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अंजनेति परिख्याता पत्नि केसरिणो हरेः ८ विख्याता त्रिषु लोकेषु रूपेणाप्रतिमा भुवि अ
भिशापाद्भूत्तावद्वानरी कामरूपिणी ९ दुहिता वानरेंद्रस्य कुंजरस्य महात्मन कपित्वे चा
रु सर्वांगी कदाचित्कामरूपिणी १० मानुषं विग्रहं कृत्वा रूपयौवनशालिनी विचित्रमाला
भरणा कदाचित्क्षौमधारिणी ११ अचरत्पर्वतस्याग्रे प्रावृडंबुदसंनिभे तस्या वस्त्रं विशाला।
क्ष्याः पीतरक्तं दशं शुभं १२ स्थितया पर्वतस्याग्रे मारुतोऽपाहरच्छनैः स ददर्श ततस्तस्या वृत्तावू
रू सुसंहतौ स्तनौ च पीनौ सहितौ सुजातौ चारु चाननं १३ तां विशालायतश्रोणीं तनुमध्यां मन
स्विनी दृष्ट्वैव शुभसर्वांगीं पवनं काममोहितः १४ स तां भुजाभ्यां दीर्घाभ्यां पर्यष्वजत मारुतः

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मन्मथाविष्टसर्वांगोगतास्यातामनिंदिता सातुतत्रैवसंभ्रांतासुवृत्तावाक्यमब्रवीत् एकपत्निव्र
तमिदंकोनाशयितुमिच्छति १६ अंजनायावचःश्रुत्वामारुतःप्रत्यभाषत नत्वांहिंसामिसु
श्रोणिमाभूत्तेसुभगेभयं १७ मनसास्मित्वंगत्वायत्वांपरिषज्ययशस्विनि वीर्यवान्बुद्धिसंपन्नः
तवपुत्रोभविष्यति १८ महासत्वोमहातेजामहाबलपराक्रमः लंघनेप्लवनेचैवभविष्यतिम
यासमः १९ एवमुक्तातततुष्टाजननीतेमहाकपेः गुहायांत्वंमहाबाहोप्रसूतोप्लवगर्षभ २०
अभ्युत्थितंततःसूर्यंबालोदृष्ट्वामहावने फलंचेतिजिघृक्षुस्त्वमुत्प्लुत्याभ्युत्पतेदिवं २१ शता
नित्रीणिगत्वाथयोजनानांमहाकपे तेजसातस्यनिर्धूतोनविषादंततोगतः २२ तत्राप्युप

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

गतस्सूर्णमंतरिक्षंमहकपे क्षिप्तमिंद्रेनतेवज्रंकोपाविष्टेनचेतसा २२ तदाशैलाग्रशिखरेवामो
हनुरभज्यतः ततोहिनामधेयंतेहनूमानितिकीर्तितं २३ ततस्त्वाविक्षतंदृष्ट्वावायुर्गंधवहःस्वयं त्रै
व लोक्यभयसंक्रुद्धोनैवौवेप्रभंजन २४ सम्भ्रांतश्चसुरासर्वेत्रैलोक्येक्षुभितेसति प्रसादितेति
संक्रुद्धंमारुतंभुवनेश्वराः २५ प्रसादितेचपवनेब्रह्मातुभ्यंवरंददौ अशस्त्रवध्यतांतातसमरेस
त्यविक्रमः २६ वज्रस्यचनिपातेनविरुजंवासमीक्ष्यच सहस्रनेत्रःप्रीतात्माददौतेवरमुत्त
मं २७ स्वछंदतश्चमरणंतवस्यादितिवेप्रभोः सत्वंकेसरिणःपुत्रःक्षेत्रजोभीमविक्रमः २८
मारुतस्यौरसपुत्रस्तेजसा[illegible]पितस्समः इहशस्यहितेतातवर्णयामिकथंवलं २९ कार्यंचलोक

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रा॰ सामान्यंकर्तुंशक्तस्त्वमेवहि भवान्वीरतमोस्माकमंजनागर्भसंभव २१ त्वंहिवायुसुतोवत्सप्ल
२ वनेवापितत्समः २२ वयमद्यगतप्राणाभवानस्मासुसांप्रतं दक्षोविक्रमसंपन्नःपक्षिराजइवा
परः २३ त्रिविक्रमेमयातातसशैलवनकानना त्रिःसप्तकृत्वापृथिवीपरिक्रांताप्रदक्षिणा २४
तदाचौषधयोस्माभिःसंचितादेवशासनात् निष्पन्नममृतंयोभिस्तदानीनोमहद्बलं २५ सइदा
नीमहन्वृद्धःपरिहीनपराक्रमः सांप्रतंकालमस्माकभवान्सर्वगुणाधिकः २६ तद्विजृंभस्व
विक्रांतःप्लवतामुत्तमोह्यसि त्वद्वीर्यंद्रष्टुकामाहिसर्वावानरवाहिनी २७ उत्तिष्ठहरिशार्दूललं राम
घयस्वमहार्णवं पराहिसर्वभूतानांहनूमान्यागतिस्तव २८ विषण्णाहरयःसर्वेहनूमान्किमु २

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पेक्षसे विक्रमस्यमहावेगंयथाविष्णुस्त्रिविक्रमे ३९ ततस्तुवैजांबवताप्रचोदितःप्रतीतवेगःप
वनात्मजःकपिः॥प्रहर्षयंस्तान्हरिवीरवाहिनीचकाररूपंपवनात्मजस्तदा ४० ॥ ६ ॥
इत्यार्षेरा॰कि॰कां॰सर्गः॥ ६६ ॥तंदृष्ट्वाजृंभमाणंतेक्रमितुंशतयोजनं वेगेनपूर्यमाणंचस
हसावानरोत्तमं १ सहसाशोकमुत्सृज्यप्रहर्षेणसमन्विताः विनेदुस्तुष्टुवुश्चापिहनुमंतंमहा
बलं २ प्रहृष्टाविस्मिताश्चापितेवीक्षंतेसमंचतः त्रिविक्रमेकृतोत्साहंनारायणमिवाप्रजाः ३
संस्तूयमानोहनुमान्व्यवर्धतमहाबलः समाविध्यचलांगूलंहर्षाद्बलमुपेयिवान् ४ तस्यसं
स्तूयमानस्यवृद्धैर्वानरपुंगवैः तेजसापूर्यमाणस्यरूपमासीदनुत्तमं ५ यथाविजृंभतेसिंहो

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रा॰ विहृते गिरिगह्वरे मारुतस्यौरसः पुत्रस्तथा संप्रतिजृंभते ६ अशोभत मुखं तस्य जृंभमाणस्य धी
४ मतः अंबरीषमिवादीप्तं विधूम इव पावकः हरीणामुत्थितो मध्यात्संप्रहृष्टतनूरुहः अभिवा
द्य हरीन्वृद्धान्हनूमानिदमब्रवीत् ८ आरुहन्पर्वताग्राणि हुताशनसखानिलः बलवानप्रमे न
यश्च वायुराकाशगोचरः ९ तस्याहं शीघ्रवेगस्य शीघ्रगस्य महात्मनः मारुतस्यौरसपुत्रः प्ल
वनेनास्मि तत्समः १० उत्सहेयं तु विस्तीर्णमालिखंतमिवांबरं मेरुं गिरीमसंगेन परिगंतुम
हस्रशः वायुवेगप्रणुन्नेन सागरेणाहमुत्सहे समाप्लावयितुं लोकं सपर्वतनदीह्रदं १२ राम
ममोरुजंघवेगेन भविष्यति समुत्थितः समुच्छ्रितमहग्राहः समुद्रो वरुणालयः १३ पन्नागा ४

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शनमाकाशेपतंतंपक्षिसेविते वैनतेयमहाशक्तःपरिगंतुंसहस्रशः १४ उदयात्प्रस्थितंचापि
ज्वलंतंरश्मिमालिनं अनस्तमितमादित्यमहंगंतुंसमुत्सहे १५ ततोभूमिमसंस्पृश्यपुनर्गं
तुमुत्सहे प्रवेगेनैवमहताभीमेनप्लवगर्षभाः १६ उत्सहेयमतिक्रांतुंसर्वानाकाशगोचरान्
सागरान्शोषयिष्यामिदारयिष्यामिमेदिनीं १७ पर्वतांश्चूर्णयिष्यामिप्लवमानःप्लवंगमाः ह
रिष्याम्यूरुवेगेनप्लवमानोमहार्णवं १८ लतानांविविधंपुष्पंपादपानांचसर्वशः अनुयास्य
तिमामद्यप्लवमानंविहायसा १९ भविष्यतिहिमेपंथाःस्वातेःपंथाइवांबरे चरंतंघोरमाका
शमुत्पतिष्यंतिमेवच २० द्रक्ष्यंतिनिपतंतंचसर्वभूतानिवानरा महामेरुप्रतिकाशंमांद्रक्ष्यध्वं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रा० प्लवंगमाः २१ दिवमावृत्यगच्छंतगगसमानमिवांबरं विधमिष्यामिजीमूतान्कंपयिष्यामि
५ पर्वतान् २२ सागरंशोषयिष्यामिप्लवमानसमाहितः वैनतेयस्यवाशक्तिममवामारुतस्यवा २३
ऋतेसुपर्णराजानंमारुतंवामहाबलं नतद्भूतंप्रपश्यामियन्मांप्लुतमनुव्रजेत् २४ निमेषांतरमात्रे
णनिरालंबनमंबरं सहसानिपतिष्यामिघनाद्विद्युदिवोदिता २५ भविष्यतिहिमेरूपंप्लवमान
स्यसागरे विष्णोर्विक्रममाणस्यतथात्रीन्विक्रमानिव २६ मंत्रः बुध्याचाहंप्रपश्यामिमनश्चे
ष्टाचमेतथा अहंद्रक्ष्यामिवैदेहीप्रमोदध्वंप्लवंगमः २७ मारुतस्यसमोवेगेगरुडस्यसमोजवे॥ राम
अयुतंयोजनानांतुगमिष्यामिमेमतिः २८ वासवस्यचवज्रस्यब्रह्मणोवास्वयंभुवः विक्रम्यसहसाहस्ता ५

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अमृतंतदिहानयेत् २९ लंकांवापिसमुत्क्षिप्यगच्छेयमितिमेमतिः तमेववानरश्रेष्ठगंर्जंतममितौजसं
प्रहृष्टाहरयस्तत्रसमुदैक्ष्यतविस्मिताः ३१ तच्चास्यवचनंश्रुत्वाज्ञातीनांशोकनाशनं उवाचपरिसंहृष्टोजा
म्बवान्प्लवगेश्वरः ३२ वीरकेसरिणःपुत्रवेगवान्मारुतात्मजः ज्ञातीनांविपुलःशोकस्त्वयातातप्रणाशितः
तवकल्याणरुचयःकपिमुख्याःसमागताः मंगलंकार्यसिध्यर्थंकरिष्यंतिसमाहिता ऋषीणांचप्रसादेनक
पिवृद्धमतेनच गुरूणांचप्रसादेनप्लवस्वत्वंमहार्णवं स्थास्यामश्चैकपादेनयावदागमनंप्रति त्वद्गतानि
चसर्वेषांजीवनानिवनौकसां ततस्तुहरिशार्दूलस्तानुवाचवनौकसः नेयंमममहीवेगंप्लवनेधारयिष्यति
एतानीहनगस्यास्यशिलासंकटशालिनि शिखराणिमहेंद्रस्यस्थिराणिचमहंतिच ३८ येषुवेगंगमि

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रा॰ ष्यामिमहेंद्रशिखरेष्वहं नानाद्रुमविकीर्णेषु धातुनिष्यंदशोभिषु ४९ एतानिममवेगंहिशिखराणिमहां
६ निच प्रवतोधारयिष्यंतियोजनानांमितःशतं ५० ततस्तुमारुतप्रख्यःसहरिर्मारुतात्मजः आरुरोहन
गश्रेष्टंमहेंद्रमरिमर्दनः वृतंनानाविधैपुष्पैर्मृगसेवितशाद्वलं लताकुसुमसंबाधंनित्यपुष्पफलद्रुमं
सिंहशार्दूलसहितंमत्तमातंगसेवितं मत्तद्विजगणोद्घुष्टंसलिलोत्पीडसंकुलं ५२ महद्भिरुछ्रितंश्रृंगै
महेंद्रस्यमहाबलः विचचारहरिश्रेष्टोमहेंद्रसमविक्रम ५३ बाहुभ्यांपीडितेस्तेनमहाशैलोमहात्मना
रराजसिंहमहतोमहामत्तइवद्विपः ५५ मुमोचसलिलोत्पीडान्विप्रकीर्णशिलोच्चयः वित्रस्तमृगमा राम
तंगःप्रकंपितमहाद्रुमः ५६ नानागंधर्वमिथुनैःपानसंसर्गकर्कशैः उत्पतद्भिर्विहंगैश्चविद्याधरगणै ६

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रा॰ रपि ४७ तज्यमानमहासानुःसन्निलीनमहोरगः चलच्छृंगशिलोद्भूतस्तदाभूत्समहागिरिः ४८ नि
७ श्वसद्भिस्तदातैस्तुभुजंगैरर्धनिःसृतैः सपताकाइवाभातिसतदाधरणीधरः ४९ ऋषिभिस्त्राससंभ्रां
तैस्त्यज्यमानःशिलोच्चयैः सीदन्महतिकांतारेसार्थहीनइवध्वगः ५० ध्यानं सवेगवान्वेगसमाहि
तात्माहरिप्रवीरःपरवीरहंता मनःसमधायमहानुभावोजगामलंकामनसाहनूमान् ५१ ॥ ॥
इत्यार्षेश्रीरामायणेकिष्किंधाकांडेसप्तषष्टितमःसर्गः ६७ ॥ ॥श्रीसंवत् १९१४ वैशाखकृ
ष्ण १३ बुधे लिखितम् राम
७

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२१२

१३८

पुर्णप॰७

Kashi Maharani Collection, Ramnagar Fort, Varanasi